दुष्टव्रणे यद्विहितञ्च तैलं
तत् सेव्यमानं गतिमाशु हन्ति ॥
जात्यर्कसम्पाककरञ्जदन्ती-
सिन्धूत्थसौवर्च्चलयावशूकैः ।
वर्त्तिः कृता हन्त्यचिरेण नाड़ीं
स्नुक्क्षीरपिष्टा सह चित्रकेण ॥
महिषदधिकोद्रवान्नमिश्रं हरति चिरविरूढ़ाञ्च।
भुक्तं कङ्गुनिकामूलचूर्णमतिदारुणां हन्ति ॥
कृशदुर्ब्बलभीरूणां गतिर्म्मर्म्माश्रिता च या ।
क्षारसूत्रेण तां भिन्द्यान्न शस्त्रेण कदाचन ॥
एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूचीं विदध्याद्गत्यन्ते चोन्नम्याशु च निर्हरेत् ॥
सूत्रस्यान्तं समानीय गाढ़बन्धनमाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्तं मतिमान् वैद्यो यावन्न छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
गुग्गुलुस्त्रिफलाव्योषैः समांशैराज्ययोजितः ।
नाड़ीदुष्टव्रणं शूल-भगन्दरविनाशनः ॥
इति सप्ताङ्गगुग्गुलुः ॥
स्वर्ज्जिका सिन्धुदन्त्यग्निरूपिकानलनीलिका ।
खरमञ्जरीबीजेषु तैलं गोमूत्रपाचितम् ॥
दुष्टव्रणप्रशमनं कफनाड़ीव्रणापहम् ॥
इति स्वर्ज्जिकाद्यं तैलम् ॥
समूलपत्रां निर्गुण्डीं पीडयित्वा रसेन तु ।
तेन सिद्धं समं तैलं नाड़ीदुष्टव्रणापहम् ॥
हितं पामापचीनाञ्च पानाभ्यञ्जननावनैः ।
विविधेषु च स्फोटेषु तथा सर्व्वव्रणेषु च ॥
इति निर्गुण्डीतैलम् ।
हंसपाद्यरिष्टपत्रं जातीपत्रं ततो रसैः ।
तत्कल्केन पचेत्तैलं नाड़ीव्रणविशोधनम् ॥
इति हंसपादादितैलम् ॥”
इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारः ॥)

नाड़ीशाकः, पुं, (नाड़ीप्रधानः शाकः ।) नाड़ीकः । इति भावप्रकाशः ॥ नाट्शाक इति भाषा ॥

नाड़ीस्नेहः, पुं, (नाड्यामेव स्नेहो यस्य । नाड़ीसारत्वादेवास्य तथात्वम् ।) भृङ्गी । इति शब्दरत्नावली ॥

नाड़ीहिङ्गु, स्त्री, (नाड़ीप्रधानं हिङ्गु ।) हिङ्गुभेदः । कलःपतिहिङ्गु इति हिन्दीभाषा । तत्पर्य्यायः । पलाशाचः २ जन्तुका ३ रामठी ४ वंशपत्री ५ पिण्डाका ६ सुवीर्य्या ७ हिङ्गुनाड़िका ८ । (यथाच वैद्यकरत्नमालायाम् ।
“हिङ्गुपर्णी वेणुपत्री नाड़ीहिङ्गु शिवाटिका ॥”)
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातानिशान्तिकारित्वम् । विष्टाविबन्धदोषनाशामयनाशित्वञ्च । इति राजनिर्घण्टः ॥

नाणकं, क्ली, (अणति शब्दायते इति । अण शब्दे + ण्वुल् । न आणकम् ।) मुद्राचिह्नितनिष्कादि । यथा,—
“तुलाशासनमानानां कूटकृन्नाणकस्य च ।
एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम् ॥”
इति मिताक्षरायां साहसप्रकरणीययाज्ञवल्क्यवचनम् ॥

नाथं, क्ली, (नम्यते आख्यायते प्रशस्यते सर्व्वैरिति । नम + इन् । बाहुलकात् अन्तलोप आत्वञ्च ।) विचित्रम् । प्रशः । शिवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

नाथ, ऋ ङ आशिषि । इवैश्वर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा-परं-आत्मं च-सकं-ऐश्ये अकं-सेट् ।) दन्त्यादिरयम् । ऋ, अननाथत् । ङ, प्रणाथते प्रनाथते । इव उपतापः । आशीरिष्टार्थाशंसनम् । ङित्त्वेऽपि शपथाशीर्गत्वगुकारे इति नियमादाभ्यामाशिषोऽन्यत्र परस्मैपदम् । नाथति शत्रुं बली उपतापयतीत्यर्थः । नाथते श्रियं लोकः आशंसते इत्यर्थः । नाथति धनी ईश्वरः स्यादित्यर्थः । नाथति भूपं भूमिं विप्रः प्रार्थयतीत्यर्थः । मार्गणैरथ तव प्रयोजनं नाथसे किमु न भूभृतः पतिमिति भारवौ याचनमप्याशंसाविशेषः । आशिषि नित्यमात्मनेपदमन्यत्र विभाषयेति केचित् । इति दुर्गादासः ॥

नाथः, पुं, (नाथति ईश्वरो भवतीति । नाथ ऐश्वर्य्ये + अच् ।) ऐश्वर्य्ययुक्तः । तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परिवृढ़ः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ आर्य्यः १० प्रभुः ११ भर्त्ता १२ ईश्वरः १३ विभुः १४ ईशिता १५ इनः १६ नायकः १७ । इति हेमचन्द्रः ।३।२३॥ (यथा, रामायणे । २ । ४८ । १७ ।
“स हि नाथो जनस्यास्य स गतिः स परायणम् ॥”)

नाथवान्, [त्] त्रि, (नाथो विद्यतेऽस्येति । नाथ + मतुप् । मस्य वः ।) पराधीनः । इत्यमरः ।३। १ । १६ ॥ प्रभुविशिष्टः ॥ (रक्षकवान् । यथा, रामायणे । १ । ६२ । १२ ।
“नाथवांश्च शुनःशेफो यज्ञश्चाविघ्नतो भवेत् ॥”
स्त्रियां ङीप् । यथा, रामायणे । २ । ६८ । १ ।
“तस्यां चीरं वसानायां नाथवत्यामनाथवत् ।
प्रचुक्रोश जनः सर्व्वो धिक् त्वां दशरथन्त्विति ॥”)

नाथहरिः, पुं, (नाथं हरति स्थानात् स्थानान्तरं नयतीति । नाथ + हृ + “हरतेर्दृतिनाथयोः पशौ ।” ३ । २ । २५ । इति इन् ।) पशुः । इति मुग्धबोधव्याकरणम् ॥

नादः, पुं, (नद शब्दे + भावे घञ् ।) शब्दः । इत्यमरः । १ । ७ । २३ ॥ (यथा, हरिवंशे । २३५ । ५६ ।
“विभान्ति ते देववराः ससाध्याः
प्रध्मातशङ्खस्वनसिंहनादाः ॥”)
अर्द्धचन्द्राकृतिवर्णः । स चानुस्वारवदुच्चार्य्यः । यथा अर्द्धचन्द्रोऽनुस्वारः । इति भुवनेश्वरीमन्त्रे हयानन्दः ॥ तत्पर्य्यायः । अर्द्धेन्दुः २ अर्द्धमात्रा ३ कलाराशी ४ सदाशिवः ५ अनुच्चार्य्या ६ तुरीया ७ विश्वमातृकला ८ परा ९ । इति बीजवर्णाभिधानम् ॥ ब्रह्मस्वरूपघोषविशेषः । यथा,—
“सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादस्तस्माद्विन्दुसमुद्भवः ॥
नादो विन्दुश्च बीजञ्च स एव त्रिविधो मतः ।
भिद्यमानात् पराद्विन्दोरुभयात्मा रवोऽभवत् ॥
स रवः श्रुतिसम्पन्नः शब्दो ब्रह्माभवत् परम् ॥
सकलादिति मूर्त्तात् । नादो घोषः । विन्दुः प्रणवः स च बीजञ्च सर्व्ववर्णप्रभवत्वात् । तथा च ।
समाहितात्मनो ब्रह्मन् ! ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥
ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तः प्रभवः स्वराट् ।
इत्यारभ्य ततोऽक्षरसमाम्नायमसृजद्भगवानजः ॥
इति श्रीभागवतम् ॥”
इत्यलङ्कारकौस्तुभस्य द्वितीयस्तवकः ॥ * ॥
“नाभेरूर्द्ध्वं हृदि स्थानान्मारुतः प्राणसंज्ञकः ।
नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः ॥
अपि च ।
आकाशाग्निमरुज्जातो नाभेरूर्द्ध्वं समुच्चरन् ।
मुखेऽभिव्यक्तिमायाति यः स नाद इतीरितः ॥
स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः ॥
आद्यः कायभवो वीणादिभवस्तु द्वितीयकः ।
तृतीयोऽपि च वंशादिभव इत्थं त्रिधा मतः ॥
यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः ।
तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः ।
वह्निमारुतसंयोगान्नादः समुपजायते ॥
न नादेन विना गीतं न नादेन विना स्वरः ।
न नादेन विना रागस्तस्मान्नादात्मकं जगत् ॥
न नादेन विना ज्ञानं न नादेन विना शिवः ।
नादरूपं परं ज्योतिर्नादरूपी परं हरिः ॥”
इति सङ्गीतदामोदरः ॥
(यथा च सङ्गीतदर्पणे ।
“गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते ।
तद्द्वयानुगतं नृत्यं नादाधीनमतस्त्रयम् ॥
नादेन व्यज्यते वर्णः पदं वर्णात् पदाद्वचः ।
वचसो व्यवहारोऽयं नादाधीनमतो जगत् ॥
आहतोऽनाहतश्चेति द्विधा नादो निगद्यते ॥
सोऽयं प्रकाशते पिण्डे तस्मात् पिण्डोऽभिधीयते ॥
तत्रानाहतनादन्तु मुनयः समुपासते ।
गुरूपदिष्टमार्गेण मुक्तिदं न तु रञ्जकम् ॥
स नादस्त्वाहतो लोके रञ्जको भवभञ्जकः ।
श्रुत्यादिद्वारतस्तस्मात्तदुत्पत्तिर्निरूप्यते ॥”
किञ्च,—
“धर्म्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥
नादविद्यां परां लब्ध्वा सरस्वत्याः प्रसादतः ।
कम्बलाश्वतरौ नागौ शम्भोः कुण्डलतां गतौ ॥
पशुः शिशुर्मृगो वापि नादेन परितुष्यति ।
अतो नादस्य माहात्म्यं व्याख्यातुं केन शक्यते ॥”
व्याञ्जनेयः ।
“नादाब्धेस्तु परं पारं न जानाति सरस्वती ।
अद्यापि मज्जनभयात्तुम्बं वहति वक्षसि ॥”
अथ नादोत्पत्तिप्रकारः ।
“आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम् ।
ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥